हृतानां प्राकृतीनां स्थाने भवन्ति” इति वचनात्, तद्धर्मिकाश्च भवन्तीति गम्यते” वृ०। “एष समानजातिधर्मः” २४सू०। “योऽयमतिदिष्टो विधिर्देवताभ्योऽन्यत्रापि स समानजातीयेषु भवति। समानजातीय एककार्य इत्यर्थः” वृ०। “द्वितीयस्यां वृधन्वन्तौ अग्निः पावकोऽग्निः शुचिः स नः पावकदीदिवोऽग्ने पावकरोचिषाग्निः शुचिव्रततन उदग्ने शुचयस्तव” २५सू०। “एकः पावकगुणकोऽग्निः, अपरः शुचिगुणकः। ‘साह्वान् विश्वा अभियुजोऽग्निमीले पुरोहितमिति संयाज्ये तृतीयस्यां सामिधेन्यावावपते प्रागुत्तमायाः पृथुपाजा अमर्त्य इति द्वे”२६सू०।“आवपते इति वचनात् अधिके एते सामिधेन्यौ भवतः। प्रथमायां द्वितीयस्यां तृतीयस्यामिति वचनात् यस्यामिष्टौ यत् तन्त्रं विहितं तस्यामेकदेवतायामपि तत् तन्त्रं भवति न यथोक्तनानादेवतायामेवेति” वृ०। “धाय्ये इत्युक्त एते प्रतीयात् पुष्टिमन्तावग्निना रयिमश्नवद्वयस्कानो अमीवहेति। अग्नीषोमाविन्द्राग्नी विष्णुरिति वैकल्पिकानि” २७सू०। “त्रयाणामेको गृह्यते” वृ०। “अदितिः” २८सू०। अदितिश्चान्या, अस्यां द्वे देवते” वृ०। ‘उत त्वामदिते सुव्रतानामृतस्य पत्नीमवसे हुवेम तुविक्षत्रामजरन्तीमुरूचीं महि महीमूषु मातरं सुशर्माणमदितिं सुप्रणीतिम्” २९सू०। “एषा कल्पजा” वृ०। ‘प्रेद्धो अग्न इमो अग्न इति संयाज्ये विराजावित्युक्त एते प्रतीयादिति तिस्रः” ३०सू०। “इत्येतास्तिस्र इष्टयोऽनुक्रान्ता इत्यर्थः। उक्तानुकीर्त्तनमुत्तरार्थम्। यदाद्योत्तमे वैव स्यातामाद्या वेति पक्षस्तदापि तिसृणामिष्टीनां यावत्यो देवतास्ताः सर्वा यष्टव्या इत्येवमर्थम्। आद्योत्तमपक्षे मध्यमायां ये देवते ते आद्यायामेव प्रक्षेप्तव्ये। यदा पुनराद्यैव तदा सर्वा देवता आद्यायामेव प्रक्षेप्तव्या इत्येवमर्थम्’ वृ०। ‘आद्योत्तमे वैव स्याताम्’’३१सू०। “इष्टी इति शेषः। ‘आद्या वा” ३२सू०। “आद्यैवेष्टिर्भवतीत्यर्थः’ वृ०। ‘तथा सति तस्यामेव धाय्ये विराजौ” ३३सू०। “यद्याद्यैव भवति तदा द्वितीयतृतीययोरपि देवतास्तत्र भवन्तीत्युक्तम्। अतस्तस्यामेव धाय्ये विराजौ भवतः। धाय्याविराजामनुप्रवेशस्य निमित्तं तृतीयस्या इष्टेर्देवतानुप्रवेश इत्येवमर्थं तथा सतीत्युक्तम्’वृ०। ‘‘इतिमात्रे विकारे वैराजतन्त्रेति प्रतीयात्” ३४सू०। “पौर्णमासतन्त्रायामिष्टौ धाय्याविराण्मात्रे विकारे सति सेष्टिर्वैराजतन्त्रेति वेदितव्या’वृ०।

“आधानाद् द्वादशरात्रमजस्राः” ३५सू०। “अत्राधानमिष्टीश्चोक्त्वा आधानादूर्द्ध्वं द्वादशरात्रमजस्रा इत्युक्तम्। तस्यायमभिप्रायः, यावता कर्मसमुदायेनाग्नीनां सिद्धिर्भवति तावतः कर्मसमुदायस्याधानशब्दो वाचक इति ज्ञापयितुम्। तेनाग्न्याधेयं पुनराधेयं वेत्यत्र सेष्टिकस्याधानस्य ग्रहणं भवतीति सिद्धम्। आधानेनेष्टिभिश्च सिद्धाग्नयो द्वादशाहोरात्राणि सर्वे स्वरूपेणैव धार्यन्ते। एतदजस्रधारणमग्निहोत्रपूर्व एवाधाने भवति, अग्निहोत्रस्यैवानन्तरमुच्यमानत्वात्। अनुष्ठानक्रमेणैव कर्मणां व्याख्यानमित्युक्तत्वाच्च” वृत्तिः। एवमिष्टिसामान्यं प्रदर्श्य विशेषेष्टयस्तत्र दर्शिताः तत्रादौ नवशस्येष्टिः साचाग्रायणशब्दे दर्शिता तत्र राज्ञ एवाधिकारः त्रयाणां वर्णानामविशेषेणेतिकल्पद्वये प्राप्ते राज्ञो विशेष उच्यते “इष्टिस्तु राज्ञः” “सर्व्वेषां चैके एके सर्वेषामिष्टिरेवेति मन्यन्ते” २,९,६,७,। ‘श्यामाकेष्ट्रासौम्यचरुः स च वर्षर्त्तौ तत्र याज्यादिकं २,९,८,९,१०, सू०उक्तम्। अन्यनवान्नभोजने जप्यमन्त्रादिकमुक्तम् १२,१२। एतानित्या इष्टयः अथ काम्याः इष्टयः २,१०,१२, सूत्रादौ। तत्र आयुष्कामेष्टिस्तत्र अग्निगुणभेदजीवातुमद्देवता २,१०,२,३,४, सू०। स्वस्त्ययनेष्टिः रक्षितवद्देवताका तत्र याज्यादिकम् ५,६,७, पुत्रकामेष्टिः पुत्रवद्गुणकाग्निदेवताका तत्र याज्यादि ८,९, १०, वैमृधेष्टिः विमृद्गुणकेन्द्रदेवताका तत्र याज्यादिकं १३,१४,१५, सू०। आशेष्टिराशापालदेवताका तत्र याज्यादिकम् १७,१८, सू०। लोकेष्टिः पृथिव्यन्तरिक्षदेवताका तत्र याज्यादिकम् २०,२१,२२, सू० मित्रप्राप्तिकामेष्टिः अग्निसोमवरुणमित्रेन्द्रबृहस्पतिसवितृपूषन्सरस्वतीदेवताका तत्र याज्यादि ११,२,३,४,३। इयमिष्टिः महावैराजीनामा। अभिचारकामेष्टिः सुषास्वघुरीयनाम्नी स्तरगुणकेन्द्रदेवताका तत्र याज्यादि ११,७,८,९। विमतसम्मतिकामेष्टिः संज्ञानो नाम वसुरुद्रादिगुणकाग्निसोमादिचतुष्टयदेवताका तत्र याज्यादि १०,११। भेदकामेष्टिः। इन्द्रामरुद्देवताका तत्र याज्यादि १३,१४,१५,१६,सू०। सम्पत्तिकामेष्टिः ऐन्द्रामारुती संज्ञानीवत् याज्यादिकम्। १७,सू०। शत्रभिभवनिवृत्तिकामेष्टिः ऐन्द्रावार्हस्पत्या तत्र याज्यादि १८१९ सू०। पवित्रेष्टिः। अग्न्यादिदेवताका तत्र याज्यादि २,१२,१। “वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च। ऋतावृतौ प्रयुञ्जानः पुनाति दशपौरुषम्”। वृष्टिकामेष्टिः कारीरी नाम सा च अग्न्यादि-